# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- शास्त्री (SEM-1) | **प्रश्नपत्रम्**-८ (Old) | **गुणा:** - ७० |
| **विषय:** - पुराणेतिहास: | **कोड- CE- 1-1-1** | **समय:** - २ त: ५ |
| **दिनाङ्क:** - २२/१२/२०१८ | **सन्दर्भग्रन्थ:**- वाल्मिकीयरामायणे सुन्दरकाण्डे १-३४ सर्गा: | |

---

**॥ प्रथमान्विति: ॥**

**प्र-१ कयोरपि द्वयो: श्लोकयो: ससन्दर्भं सप्रसङ्गं संस्कृते व्याख्या कार्या ।** **१०**

१. बुद्धिप्रधानान् रुचिराभिधानान् संश्रद्धधानाञ्जगत: प्रधानान् ।
नानाविधानान् रुचिराभिधानान् ददर्श तस्यां पुरि यातुधानान् ॥

२. मन: सनाधाय तु शीघ्रगामिनं दुरासदं मरुतुल्यगामिनम् ।
महात्मनां पुण्यकृतां महर्द्धिनां यशस्विनामग्र्यमृदामिवालयम् ॥

३. स्वर्गोऽयं देवलोकोऽयमिन्द्रस्यापि पुरी भवेत् ।
सिद्धिर्वेयं परा हि स्यादित्यमन्मत मारुति: ॥

**प्र-२ कस्याप्येकस्य निबन्धात्मकमुत्तरं लिखत ।** **१०**

१. हनुमता कृतं समुद्रलङ्घनं विवर्ण्य लङ्काया: या शोभास्ति तां वर्णयत ।

२. हनुमता कृतं रावणस्यान्तपुरप्रवेशवर्णनं तथा रावणस्य पुष्पकं वर्णयत ।

**॥ द्वितीयान्विति: ॥**

**प्र-३ कयोरपि द्वयो: श्लोकयो: ससन्दर्भं सप्रसङ्गं संस्कृते व्याख्या कार्या ।** **१०**

१. अनिर्वेद: श्रियो मूलमनिर्वेद: परं सुखम् ।
भूयस्तत्र विचेष्यामि न यत्र विचय: कृत: ॥

२. नमोऽस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै ।
नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो नमोऽस्तु चन्द्राग्निमरुद्गणेभ्य: ॥

३. स रामा राजमहिषी राघवस्य प्रिया सती ।
वनसंचारकुशला ध्रुवमेष्यति जानकी ॥

**प्र-४ कस्याप्येकस्य निबन्धात्मकमुत्तरं लिखत ।** **१०**

१. लङ्कायां सीताम् अदृष्ट्वा हनुमत: निरुत्साह: पुन: स्वात्मविश्वासपूर्वकं सीतान्वेषणं यथाग्रन्थं प्रतिपादयत ।

२. हनुमत: अशोकवाटिकाप्रवेशं विवर्ण्य अशोकवाटिकाया: शोभां वर्णयत ।

**॥ तृतीयान्वितिः ॥**

**प्र-५ कयोरपि द्वयोः श्लोकयोः ससन्दर्भं सप्रसङ्गं संस्कृते व्याख्या कार्या । १०**

१. रक्षिता स्वस्य वृत्तस्य स्वजनस्यापि रक्षिता ।
   रक्षिता जीवलोकस्य धर्मस्य च परंतपः ॥

२. आदित्य इव तेजस्वी लोककान्तः शशी यथा ।
   राजा सर्वस्य लोकस्य देवो वैश्रवणो यथा ॥

३. यो ब्राह्ममस्त्रं वेदांश्च वेद वेदविदां वरः ।
   स त्वां दाशरथी रामो देवि कौशलमब्रवीत् ॥

**प्र-६ कयोश्चिद् द्वयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या । १०**

१. हनुमता कृतं सीताग्रे रामगुणवर्णनं यथाग्रन्थं प्रतिपादयत ।

२. लङ्कायां हनुमता प्रतिपादितं स्वबुद्धिचातुर्यं तथा त्रिजटायाः स्वप्नवृत्तान्तं विलिखत ।

**॥ चतुर्थान्वितिः ॥**

**प्र-७ दशानां लघूत्तराणि लिखत । १०**

१. रामायणे कति श्लोकाः सन्ति?

२. रामायणे कति काण्डाः सन्ति?

३. रामायणस्य का व्युत्पत्तिः?

४. रामायणशब्दस्य कोऽर्थः ?

५. लङ्कायां हनुमान् कदा कस्मिन् काले प्रविशति?

६. पुष्पकं केन निर्मितम् आसीत्?

७. अशोकवाटिकाया अपरं नाम किम्?

८. रावणस्य कति पुत्रा आसन्?

९. रावणस्य पत्न्याः नाम किम्?

१०. राम शब्दस्य कोऽर्थः ? वा का व्युत्पत्तिः?

११. रावणशब्दस्य कोऽर्थः ?

१२. हनुमान् शब्दस्य षष्ठी एकवचनं किम्?

१३. रामगुणान् हनुमान् कस्यां भाषायां वर्णयति?

१४. हनुमत अपरं नाम किम्?

१५. स्नुषा – इत्यस्य कोऽर्थः ?

--००--